# || श्रीकादिविद्येश्वरी कालिका स्तोत्रम् ||

श्रीदेव्युवाच
स्वामिन् सर्वजगन्नाथ प्रणतार्तिविनाशन |
कालिकायाः महास्तोत्रं ब्रूहि भक्तेष्टदायकम् ||

श्रीदक्षिणामूर्तिरुवाच
एवं कालीं महादेवीं संपूज्य नरपुङ्गवः |
स्तोत्रं जपेदिदं नित्यं कालिकाया महेश्वरि ||

ॐ क्रीं
जय त्वं कालिके देवि जय मातर्महेश्वरि |
जय दिव्ये महालक्ष्मि महाकालि नमोऽस्तु ते || १ ||
मुक्तकेशि नमस्तेऽस्तु नमस्तुभ्यं चतुर्भुजे |
वीरकालि नमस्तुभ्यं मृत्युकालि नमो नमः || २ ||
नमः करालवदने नमस्ते घोररूपिणि |
भद्रकालि नमस्तुभ्यं महाकालप्रिये नमः || ३ ||
जय त्वं सर्वविद्यानामधीश्वरि शिवप्रिये |
वागीश्वरि महादेवि नमस्तुभ्यं दिगम्बरे || ४ ||
नीलमेघप्रतीकाशे नीलाम्बरविराजिते |
आदिमध्यान्तरहिते नमस्ते गणकालिके || ५ ||
सर्वसम्पत्प्रदे नित्यं सर्वोपद्रवनाशिनि |
महामाये महाकृष्णे भक्तशत्रुविनाशिनि || ६ ||
जगन्मातर्जगद्रूपे विरूपाक्षि नमोऽस्तु ते |
सिंहारूढे नमस्तुभ्यं गजारूढे नमो नमः || ७ ||
नमो भद्राङ्गि रक्ताक्षि महादेवस्वरूपिणि |
निरीश्वरि निराधारे निरालम्बे नमो नमः || ८ ||
निर्गुणे सगुणे तुभ्यं नमस्तेऽस्तु सरस्वति |

नीलकेशि नमस्तुभ्यं व्योमकेशि नमोऽस्तु ते || ९ ||
नमस्ते पार्वतीरूपे नम उत्तरकालिके |
नमस्ते चण्डयोगेशि चण्डास्ये चण्डनायिके || १० ||
जयत्वं चण्डिके भद्रे चामुण्डे त्वां नमाम्यहम् |
नमस्तुभ्यं महाकाये नमस्ते मातृसंस्तुते |
नमस्ते सिद्धसंस्तुत्ये हरिरुद्रादि पूजिते || ११ ||

फलश्रुतिः
कालिके त्वां नमस्यामि तवोक्तं गिरिसम्भवे |
य एतन्नित्यमेकाग्रः प्रजपेन्मानवोत्तमः ||
स मुच्यते महापापैः जन्मकोटिसमुद्भवैः |
व्याचष्टे सर्वशास्त्राणि विवादे जयमाप्नुयात् ||
मूकोऽपि ब्रह्मसदृशो विद्यया भवति ध्रुवम् |
एकेन श्रवणेनैव ग्रहेद् वेदचतुष्टयम् ||
महाकविर्भवेन्मन्त्री लभते महतीं श्रियम् |
जगत् त्रयं वशीकुर्यात् महासौन्दर्यवान् भवेत् |
अष्टैश्वर्याण्यवाप्नोति पुत्रान् पौत्राननुत्तमान् |
देवीसामीप्यमाप्नोति अन्ते नात्र विचारणा ||

|| इति श्रीत्रिपुरसुन्दरी तन्त्रे कालीस्तुतिर्नाम षड्विंशतिः ||

## || śrīkādividyeśvarī kālikā stotram ||

śrīdevyuvāca
svāmin sarvajagannātha praṇatārtivināśana |
kālikāyāḥ mahāstotraṃ brūhi bhakteṣṭadāyakam ||

śrīdakṣiṇāmūrtiruvāca
evaṃ kālīṃ mahādevīṃ saṃpūjya narapuṅgavaḥ |
stotraṃ japedidaṃ nityaṃ kālikāyā maheśvari ||

OM krīṃ
jaya tvaṃ kālike devi jaya mātarmaheśvari |
jaya divye mahālakṣmi mahākāli namo.astu te || 1 ||
muktakeśi namaste.astu namastubhyaṃ caturbhuje |
vīrakāli namastubhyaṃ mṛtyukāli namo namaḥ || 2 ||
namaḥ karālavadane namaste ghorarūpiṇi |
bhadrakāli namastubhyaṃ mahākālapriye namaḥ || 3 ||
jaya tvaṃ sarvavidyānāmadhīśvari śivapriye |
vāgīśvari mahādevi namastubhyaṃ digambare || 4 ||
nīlameghapratīkāśe nīlāmbaravirājite |
ādimadhyāntarahite namaste gaṇakālike || 5 ||
sarvasampatprade nityaṃ sarvopadravanāśini |
mahāmāye mahākṛṣṇe bhaktaśatruvināśini || 6 ||
jaganmātarjagadrūpe virūpākṣi namo.astu te |
siṃhārūḍhe namastubhyaṃ gajārūḍhe namo namaḥ || 7 ||
namo bhadrāṅgi raktākṣi mahādevasvarūpiṇi |
nirīśvari nirādhāre nirālambe namo namaḥ || 8 ||
nirguṇe saguṇe tubhyaṃ namaste.astu sarasvati |
nīlakeśi namastubhyaṃ vyomakeśi namo.astu te || 9 ||
namaste pārvatīrūpe nama uttarakālike |
namaste caṇḍayogeśi caṇḍāsye caṇḍanāyike || 10 ||
jayatvaṃ caṇḍike bhadre cāmuṇḍe tvāṃ namāmyaham |
namastubhyaṃ mahākāye namaste mātṛsaṃstute |
namaste siddhasaṃstutye harirudrādi pūjite || 11 ||

phalaśrutiḥ
kālike tvāṃ namasyāmi tavoktaṃ girisambhave |
ya etannityamekāgraḥ prajapenmānavottamaḥ ||
sa mucyate mahāpāpaiḥ janmakoṭisamudbhavaiḥ |
vyācaṣṭe sarvaśāstrāṇi vivāde jayamāpnuyāt ||
mūko.api brahmasadṛśo vidyayā bhavati dhruvam |
ekena śravaṇenaiva grahed vedacatuṣṭayam ||
mahākavirbhavenmantrī labhate mahatīṃ śriyam |

jagat trayaṃ vaśīkuryāt mahāsaundaryavān bhavet |
aṣṭaiśvaryāṇyavāpnoti putrān pautrānanuttamān |
devīsāmīpyamāpnoti ante nātra vicāraṇā ||

|| iti śrītripurasundarī tantre kālīstutirnāma ṣaḍviṃśatiḥ ||

www.kamakotimandali.com